# dashAvatArastotram

# दशावतारस्तोत्रम्

## Document Information

Text title : Dashavatara Stotram 13

File name : dashAvatArastotram13.itx

Category : vishhnu, dashAvatAra

Location : doc_vishhnu

Proofread by : Vani V

Description/comments : Sanskrit Bharati Jan-Mar 1920 Vol 3, No 1 p 5 (17)

Latest update : March 18, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 18, 2022

*sanskritdocuments.org*

# दशावतारस्तोत्रम्

मग्ना यदाज्या प्रलये पयोधा बुद्धारितो येन तदा हि वेदः ।
मीनावताराय गदाधराय तस्मै नमः श्रीमधुसूदनाय ॥ १॥

कल्पान्तकाले पृथिवीं दधार,पृष्ठेऽच्युतो यः सलिले निमग्नाम् ।
कूर्मावताराय नमोऽस्तु तस्मै पीताम्बराय प्रियदर्शनाय ॥ २॥

रसातलस्था धरणी किलैषा दंष्ट्राग्रभागेन धृता हि येन ।
वराहरूपाय जनार्दनाय तस्मै नमः कैटभनाशनाय ॥ ३॥

स्तम्भं विदार्य प्रणतं हि भक्तं रक्ष प्रह्लादमथो विनाश्य ।
दैत्यं नमो यो नरसिंहमूर्तिर्दीप्तानलार्कद्युतये तु तस्मै ॥ ४॥

छलेन योऽजश्च बलिं निनाय पातालदेशं ह्यतिदानशीलम् ।
अनन्तरूपश्च नमस्कृतः स मया हरिर्वामनरूपधारी ॥ ५॥

पितुर्वधामर्षरयेण येन त्रिःसप्तवारान्समरे हताश्च ।
क्षत्राः पितुस्तर्पणमाहितश्च तस्मै नमो भार्गवरूपिणे ते ॥ ६॥

दशाननं यः समरे निहत्य,बद्धा पयोधिं हरिसैन्यचारी ।
अयोनिजां सत्वरमुद्दधार सीतापतिं तं प्रणमामि रामम् ॥ ७॥

विलोलनेनं मधुसिक्तवक्त्रं प्रसन्नमूर्तिं ज्वलदर्कभासम् ।
कृष्णाग्रजं तं बलभद्ररूपं नीलाम्बरं सीरकरं नमामि ॥ ८॥

पद्मासनस्थः स्थिरबद्धदृष्टिर्जितेन्द्रियो निन्दितजीवघातः ।
नमोऽस्तु ते मोहविनाशकाय जिनाय बुद्धाय च केशवाय ॥ ९॥

म्लेच्छान् निहन्तुं लभते तु जन्म कलौ च कल्की दशमावतारः ।
नमोऽस्तु तस्मै नरकान्तकाय देवादिदेवाय महात्मने च ॥ १०॥

इति दशावतारस्तोत्रं सम्पूर्णम् ।

Encoded and proofread by Vanbi V.

*dashAvatArastotram*

pdf was typeset on March 18, 2022

Please send corrections to *sanskrit@cheerful.com*